इति चेन्न योगजधर्म्मसहकारिणा मनसैव तत्सम्भवात् तदुपग्रहाच्चक्षुरादिना वा। अचिन्त्यप्रभावोहि योगजो धर्म्मो न सहकार्य्यन्तरमपेक्षते। विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वादहमिवेत्यादि तु प्राभाकरो न मीमांसाभिज्ञः पुरुषत्वादहमिवेत्यादिवद्विपक्षबाधकतर्कशून्यत्वादप्रयोजकम्। अपरे बौद्धीयञ्च प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्च सविकल्पकं ज्ञानं न प्रमाणमिति कीर्त्तिदिङ्नागादयः तथा हि अभिलापसंसर्गयोग्यप्रतिभासं हि तत् तच्चाभिलापेन नाम्ना सम्भवत्यर्थस्य सम्बन्धो येन घट इति पट इति वा नामानुरञ्जितः प्रत्ययः स्यात् नच जात्यादि परमार्थसत् येन तद्वैशिष्ट्यं विषयेषु इन्द्रियगोचरः तस्मादिन्द्रियेणालोचनं जन्यते आलोचनमहिम्ना च सविकल्पकमुत्पद्यमानं तत्रार्थे प्रवर्त्तयत् प्रत्यक्षमिति प्रोच्यते इति। तन्नैतदनुपपन्नमभिलापसंसर्गयोग्यप्रतिभासञ्च भवेत् प्रमाणञ्चेन्द्रियार्थसन्निकर्षजन्यं स्यादिति अन्वयव्यतिरेकित्वं नामवैशिष्ट्यञ्च चाक्षुषज्ञाने सम्भवत्येव सुरभि चन्दनमितिवदुपनीतभानसम्भवात्। यद्वा संज्ञावैशिष्ट्यं प्रत्यक्षज्ञाने न भासते संज्ञायाः स्मरणमात्रम् स्तैव साऽर्थव्यावर्त्तिका अभावज्ञाने प्रतियोगिस्मरणवत् जात्यादिकञ्च वस्तुभूतं साधितमेवातः सविकल्पकमपीन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षम् प्रमाणम्। ननु निर्विकल्पकं न व्यवहारप्रवर्त्तकं न वा व्यवहारविषय इति किन्तत्प्रमाणमिति चेत् सविकल्पकमेव तद्धि विशिष्टज्ञानम् न च विशेषणज्ञानमन्तरेण तदुत्पद्यते विशिष्टज्ञाने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य कारणत्वावधारणात्” उपस्कारवृत्तिः।

“सा च सात्त्विकराजसतामसभेदेन त्रिविधा। तत्र सात्त्विकी यथा“प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी”। राजसी यथा “यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी”। तामसी यथा “अधर्म्मं धर्म्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी” गीता० तस्याः पञ्चगुणा यथा। “इष्टाऽनिष्टविपत्तिश्च व्यवसायः समाधिता। संशयप्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः” महाभारते मोक्षधर्मः “इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्रारूपा वृत्तिरित्यर्थः। व्यवसायः उत्साहः। समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः संशयः द्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः” तट्टीका। तस्याः सप्त गुणा यथा। “शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः” हेमच०। तस्या वृत्तिः पञ्चधा यथा। “प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः” पात०सू० तल्लक्षणं च तत्तच्छब्दे दृश्यम्।

बुद्धिक्षयकरा यथा“शोकः क्रोधश्च लोभश्च कामो मोहः परासुता। ईर्ष्या मानो विचिकित्सा हिंसाऽसूया जुगुप्सता। द्वादशैते बुद्धिनाशहेतवो मानसा मलाः”। कालिकापु० १८अ०। “बुद्धिक्षयकरा एते मापकासारस्वात्तिकाः”। बुद्धिवृद्धिकरा यथा “निम्बाटरूषपत्त्राश्च बुद्धिवृद्धिकरा मताः। बुद्धिक्षयकरांश्चित्यं त्यजेद्राजा च भोजने। भोजयेदन्वहं बुद्धिवृद्धिहेतुं नृपोत्तमः। कालिकापु० ८६ अ०।

**बुद्धिकामा** स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ०।

**बुद्धिजीविन्** त्रि० बुद्ध्या जीवति जीव–णिनि। बुद्धिरूपोपायेन जीविनि। “भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः” मनुः।

**बुद्धिसहाय** पु० ७त०। धीसचिवे अमात्यभेदे हारा०।

**बुद्धीन्द्रिय** न०६त०। “मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके। बुद्धीन्द्रियमिति प्रोक्तम्” इत्युक्तेषु इन्द्रियेषु उभयोः ज्ञानकर्म्मेन्द्रिययोरुपकारकत्वात् मनसो ज्ञानमात्रसहकारित्वविवक्षया बाह्यान्तरज्ञानकरणतया च तथात्वम् “चक्षुः श्रोत्रे स्पर्शनञ्च रसनाघ्राणमेव च। बुद्धीन्द्रियाणि जानीयात्” इत्यत्र बाह्यापेक्षया पञ्चत्वमुक्तम्।

**बुद्बुद** न०बुद्-क पृषो०द्वित्वम्। जलस्य गोलाकारे विकारभेदे अमरः। “पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्”। सुश्रु० उक्ते २गर्भावस्थाभेदे च।

**बुध** ज्ञापने भ्वा०प०सक०अनिट्। बोधति अभौत्सीत् शिष्यं गुरुः। बोद्धा बुद्धः।

**बुध** ज्ञाने भ्वा०उभ०सक०सेट्। बोधति ते। इरित् अबुधत् अबोधीत् अबोधि अबोधिष्ट। ज्वला० वा ण पक्षे क। बोधः बुधः।

**बुध** ज्ञाने दि० आ०सक० अनिट्। बुध्यते अबोधि अबोधिष्ट। बुबुधे। उद्+बुध–जागरणे विषयस्फुरणाभिमुखीभावरूपे संस्कारनिष्ठे व्यापारभेदे उद्बुद्धसंस्कारादेव स्मृतिर्भवतीति शास्त्रे स्थितम्।